श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये नवतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये नवतितमं दशकम् ॥

## आगमादीनां परमतात्पर्यनिरूपणम्

वृकभृगुमुनिमोहिन्यम्बरीषादिवृत्ते -
    ष्वयि तव हि महत्त्वं सर्वशर्वादिजैत्रम्।
स्थितमिह परमात्मन् निष्कलार्वागभिन्नं
    किमपि यदवभातं तद्धि रूपं तवैव ॥ 90.1 ॥

मूर्तित्रयेश्वरसदाशिवपञ्चकं यत्
    प्राहुः परात्मवपुरेव सदाशिवोऽस्मिन्।
तत्रेश्वरस्तु स विकुण्ठपदस्त्वमेव
    त्रित्वं पुनर्भजसि सत्यपदे त्रिभागे ॥ 90.2 ॥

तत्रापि सात्त्विकतनुं तव विष्णुमाहु -
    र्धाता तु सत्त्वविरलो रजसैव पूर्णः।
सत्त्वोत्कटत्वमपि चास्ति तमोविकार -
    चेष्टादिकं च तव शङ्करनाम्नि मूर्तौ ॥ 90.3 ॥

तं च त्रिमूर्त्यतिगतं परपूरुषं त्वां
    शर्वात्मनापि खलु सर्वमयत्वहेतोः।
शंसन्त्युपासनविधौ तदपि स्वतस्तु
    त्वद्रूपमित्यतिदृढं बहु नः प्रमाणम् ॥ 90.4 ॥

श्रीशङ्करोऽपि भगवान् सकलेषु ताव -
    त्त्वामेव मानयति यो न हि पक्षपाती।

त्वन्निष्ठमेव स हि नामसहस्रकादि
    व्याख्यत् भवत्स्तुतिपरश्च गतिं गतोऽन्ते ॥ **90.5** ॥

मूर्तित्रयातिगमुवाच च मन्त्रशास्त्र -
    स्यादौ कलायसुषमं सकलेश्वरं त्वाम्।
ध्यानं च निष्कलमसौ प्रणवे खलूक्त्वा
    त्वामेव तत्र सकलं निजगाद नान्यम् ॥ **90.6** ॥

समस्तसारे च पुराणसङ्ग्रहे
    विसंशयं त्वन्महिमैव वर्ण्यते।
त्रिमूर्तियुक्सत्यपदत्रिभागतः
    परं पदं ते कथितं न शूलिनः ॥ **90.7** ॥

यत् ब्राह्मकल्प इह भागवतद्वितीय -
    स्कन्धोदितं वपुरनावृतमीश धात्रे।
तस्यैव नाम हरिशर्वमुखं जगाद
    श्रीमाधवः शिवपरोऽपि पुराणसारे ॥ **90.8** ॥

ये स्वप्रकृत्यनुगुणा गिरिशं भजन्ते
    तेषां फलं हि दृढयैव तदीयभक्त्या।
व्यासो हि तेन कृतवानधिकारिहेतोः
    स्कान्दादिकेषु तव हानिवचोऽर्थवादैः ॥ **90.9** ॥

भूतार्थकीर्तिरनुवादविरुद्धवादौ
    त्रेधार्थवादगतयः खलु रोचनार्थाः।
स्कान्दादिकेषु बहवोऽत्र विरुद्धवादा -
    स्त्वत्तामसत्त्वपरिभूत्युपशिक्षणाद्याः ॥ **90.10** ॥

यत् किञ्चिदप्यविदुषाऽपि विभो मयोक्तं
    तन्मन्त्रशास्त्रवचनाद्यभिदृष्टमेव।

व्यासोक्तिसारमयभागवतोपगीत
क्लेशान् विधूय कुरु भक्तिभरं परात्मन् ॥ **90.11** ॥

॥ इति श्रीमन्नारायणीये नवतितमं दशकं समाप्तम् ॥